इन्द्रियस्थानम्

प्रथमोऽध्यायः

--- द्वे वा जात एव विनश्यति

परिच्छिन्नमासमात्रजीविशिशुलक्षणम्

ह्रस्वैकपक्षो विततो यस्तु गर्भस्तु सुस्वरः
मासमेकं तु जीवित्वा विनाशायोपपद्यते १
पिण्डीशिरा दीर्घहनुरनल्पे संहते भ्रुवौ
द्वितीये मासि संप्राप्ते म्रियते गर्भ ईदृशः २
जातमात्रस्य गर्भस्य व्यञ्जनं यत्र दृश्यते
तृतीये मासि संप्राप्ते म्रियते गर्भ ईदृशः ३
त्रिकेकरो घटशिरा यस्तु गर्भस्तु सुस्वरः
चतुर्थे मासि संप्राप्ते विनाशमुपगच्छति ४

अल्पायुष्ट्वद्योतकारिष्टम्

यस्य षोडशवर्षस्य व्यञ्जनं तूपजायते
शीघ्रं च पञ्चधातुत्वादल्पायुरिह दृश्यते ५

दीर्घायुष्ट्वद्योतकम्

यस्य विंशतिवर्षस्य व्यञ्जनं तूपजायते
स दीर्घमायुराप्नोति पुरुषो नात्र संशयः ६

शरीरापचयाद्यरिष्टानि

शरीरापचयोऽबुद्धिरपथ्यानि बलं तथा
बालस्य यस्य दृश्यन्ते तं गतायुषमादिशेत् ७
यस्य जातस्य जायेते गुल्मकास्तुनकौ तथा
अष्टविंशे गते वर्षे सर्वं तं हन्ति मानवम् ८
पृष्ठे चोरसि चावर्तस्सव्यथो यस्तु दृश्यते

चत्वारिंशे गते वर्षे मरणायोपकल्पते ९
आवर्तो यश्च पृष्ठे तु सन्नतस्त्रिषु दृश्यते
फलमस्य तु विज्ञेयं स्थापनं न प्रसूयते १०
स्थूलास्थूलाङ्गुली पाणी नखा यस्यापि लोहिताः
कल्याणदेशप्रत्यङ्गः पञ्चाशद्वर्ष एव च ११
व्यूढोरस्को दीर्घभुजः स्थूलजानुश्च यो भवेत्
दीर्घाङ्गुलिर्दीर्घनखः षष्टिं वर्षाणि जीवति १२
उत्पीडितस्वरं वापि तुङ्गनासकचोन्मुखम्
ऊरुकं भद्रसम्पन्नं विद्यात्सप्ततिकं नरः १३
भद्रं पुरश्च पश्चाच्च ऋजुकं प्रियवादिनम्
अशीतिकं नरं विद्यात्कृष्णात्रेयवचो यथा १४

शतायुर्लक्षणम्

ललाटं नासिका कर्णौ यस्यैतानि पृथक् पृथक्
षडङ्गुलप्रमाणानि स जीवति शतं समाः १५
यस्याकुञ्चितमेव स्याज्जानुभ्यां समितं शिरः
ऊर्ध्वजानुगतौ कर्णौ पौत्रं पश्यत्ययं नरः १६
महान्तौ विपुलौ कर्णौ भवेतां रोमशौ तथा
स्निग्धौ बहुलकेशश्च स चेह शतमृच्छति १७

दीर्घायुःप्राप्त्युपायाः

धर्मेण सत्यवाक्येन गुरुशुश्रूषणेन च
रसायनोपयोगाच्च स दीर्घमनुजीवति १८
इत्याह भगवानात्रेयः

इति भेले इन्द्रिये प्रथमोऽध्यायः

द्वितीयोऽध्यायः

अथातः स्वस्त्ययनमिन्द्रियं व्याख्यास्याम इति ह स्माह
भगवानात्रेयः

स्वास्थ्यसूचकलक्षणानि

मुखं नेत्रे शरीरं पाणिपादं तथैव च
सरक्तं दृश्यते यस्य स वै स्वस्थौ भविष्यति १
यस्य गोमयचूर्णाभं नराणां मूर्ध्नि दृश्यते
शिरसि स्निह्यमाने च कण्डूस्संजायते दृढम् २
यस्य केशाः प्रमुच्यन्ते शीर्णमूलाः शरीरिणः
यस्यैतानि तु रूपाणि स वै स्वस्थो भविष्यति ३
नास्य दन्ताः प्रहृष्यन्ति मुखं च न विलुप्यति
नाबद्धं भाषते चापि स वै स्वस्थो भविष्यति ४
न विक्षिपति गात्राणि स्वरोऽस्य न विवर्तते
वस्त्रेण गूहते गुह्यं स वै स्वस्थो भविष्यति ५
न भवत्युन्नतो नाभिर्यथावस्थोऽभितिष्ठति
सुखं श्वसिति रात्रौ च स वै स्वस्थो भविष्यति ६
न नखाः कर्कशाभासा न श्यावा न च निष्प्रभाः
प्रसन्नास्सुप्रभाश्चैव स वै स्वस्थो भविष्यति ७
आतपाधिष्ठितो यस्तु न ----- प्रकाशचे
न च लोहितसंयु-----
इत्याह भगवानात्रेयः

इति भेले इन्द्रिये द्वितीयोऽध्यायः

तृतीयोऽध्यायः

मुमूर्षुलक्षणानि

--- धितस्वप्ने तां रात्रिं नातिवर्तते
इयं मे शिष्टशिबिका वैडूर्यमणियन्त्रिता
एवं प्रलापयेच्चार्तो गतायुरिति तं विदुः १
प्रज्वलत्यपि यो दीपे तम एवाभिपश्यति
शब्दान्विप्रतिबुध्येत चापूर्वानिव नास्ति सः २
अवाक्शिराः प्रलम्बामि नाम मा परिवर्तय
मनुजः प्रलपन्नेवं सप्ताहं नातिवर्तते ३
मर्माणि दलितानीव योऽभीक्ष्णं चातिसार्यते
प्रवाहमाणो दुर्गन्धि कुणपं पूतिकं तथा ४
तच्च लोहितगन्धं वाप्यथवा मत्स्यगन्धिकम्
कृष्णं नीलं विवर्णं वा मुमूर्षुश्च स होच्यते ५
मधुमेही वसामेही सर्पिर्मेही च यो नरः
बहुमेही च यो जन्तुः स वै प्रोक्तः परासुकः ६
अमेहेत यदा जन्तुर्बिन्दुं बिन्दुं सवेदनम्
वायुना भिन्नबस्तिः स्याद् दुर्लभं तस्य जीवितम् ७
क्रिमयो बहवो यस्य निस्सरन्ति शरीरिणः
आतुरस्य शयानस्य नौषधं तस्य सिध्यति ८
इत्येतानि भिषक् दृष्ट्वा लक्षणानि मुमूर्षताम्
न चिकित्सां प्रयुञ्जीत यथामार्गं चिकीर्षकः ९
इत्याह भगवानात्रेयः

इति भेले इन्द्रिये तृतीयोऽध्यायः

चतुर्थोऽध्यायः

अथातः सद्योमरणीयमिन्द्रियं व्याख्यास्याम इति ह स्माह भगवानात्रेयः

सद्योमरणलक्षणम्

यदातुरस्य हृदयं वायुः संगृह्य तिष्ठति
धमनीस्संपरीपीडय सद्यो जह्यात्स जीवितम् १
आतुरस्य यदा वायुः शरीरमनुपद्यते
उत्ताने नेत्रनिष्यन्दः सद्यो जह्यात्स जीवितम् २
यस्य कोष्ठगतो वायुरुपावृत्तश्शरीरिणः
क्षीणलोहितमांसस्य सद्यो जह्यात्स जीवितम् ३
यस्यातुरस्येह वाताद्वाताष्ठीला विवर्धते
न संसरति चान्यत्र सद्यः प्राणान् जहाति सः ४
यस्योभे पिण्डके स्तब्धे नासा जिह्मा च लक्ष्यते
व्यावृत्ते चाक्षिणी यस्य सद्यः प्राणान् जहाति सः ५
आमाशयसमुत्थाना यस्यैव परिकर्तिका
तृष्णा च तीव्ररागश्च सद्यः प्राणान् जहाति सः ६
पक्वाशयसमुत्थाना यस्य स्यात्परिकर्तिका
तृष्णा गलग्रहश्चोग्रः सद्यो जह्यात्स जीवितम् ७
शोणितं रोमकूपेभ्यो यस्य क्षरति देहिनः
अतीव मुखतो भेदि सद्यो जह्यात्स जीवितम् ८
हृदयस्य तु संघातं परिक्षीणस्य देहिनः
अत्यर्थं पीडयेच्छूलं सद्यः प्राणान् जहाति सः ९
यस्य क्षीणशरीरस्य संज्ञां हरति मारुतः
व्याहन्ति च महास्त्रोतः सद्यः प्राणान् जहाति सः १०
हृदयस्य तु संघातं परिक्षीणस्य देहिनः

एतैरेवंविधैर्लिङ्गैरन्यैश्चापि तथाविधैः ११
प्रकृतेर्विकृतिं प्राप्तं परीक्षेतातुरं भिषक्
इत्याह भगवानात्रेयः

इति भेले इन्द्रिये चतुर्थोऽध्यायः

पञ्चमोऽध्यायः

अथातः यस्य श्यावीयं व्याख्यास्याम इति ह स्माह भगवानात्रेयः

मुमूर्षुलक्षणानि

यस्य श्यावे उभे नेत्रे दृश्येते हरिते तथा
उत्पन्नश्च शिरोरोगः फलितं तस्य जीवितम् १
हरिताश्च सिरा यस्य रोमकूपाश्च लोहिताः
भुङ्क्ते वान्नानि साम्लानि तत्रैव स विनश्यति २
यस्योर्ध्ववातः कोपेन जन्तोरामाशयं गतः
हृदयं परिगृह्णाति परेतं तस्य जीवितम् ३
गात्रे च पाणिपादे च यस्य शुष्यति शोणितम्
मुहुर्मुहुर्नृत्यति च परेतं तस्य जीवितम् ४
वृषणौ पाणिपादौ च यस्य शुष्कं मुखं तथा
छविश्च शोषमायाति परेतं तस्य जीवितम् ५
हनू हस्तौ च पादौ च वृषणौ लिङ्गमेव च
दृश्यते देहिनो यस्य परेतं तस्य जीवितम् ६
हृदयं दह्यते यस्य मुमूर्षु तं समादिशेत्
आतुरस्तु स यातो वै परेतं तस्यजीवितम् ७
अपस्मारः क्षयः कुष्ठं रक्तपित्तमथोदरम्
गुल्मश्च मधुमेहश्च दीर्घरोगा भवन्ति ते ८
बलमांसक्षयो यस्य देहिनो दीर्घरोगिणः

दृश्येत स्वरहानिश्च परेतं तस्य जीवितम् ९
हृदयं दह्यते यस्य कोष्ठे शूलं स्वरक्षयः
अभीक्ष्णं दह्यते चापि परेतं तस्य जीवितम् १०
त्रासाभितापा जन्तूनां कोष्ठे शूलाश्चरन्ति च
हिक्काच्छर्दिपरीतश्च परेतं तस्य जीवितम् ११
वापितं ज्वलितं मर्त्यः सलिलं हि हुताशनम्
भास्करं मन्यते सोमं दुर्लभं तस्य जीवितम् १२
यश्चापि विमले सूर्ये मेघान् पश्यति सर्वशः
दुर्दिनं सुदिनं चापि परेतं तस्य जीवितम् १३
यं रसा नावतिष्ठन्ते भेषजं चेन्द्रियाणि तु
यस्य वा विपरीतानि न च जीवति तादृशः १४
वानस्पत्यफलं मूलं रोगस्पृष्टस्य यस्य वै
भैषज्यार्थं न दृश्येत न च जीवति तादृशः १५
इत्येतानि भिषग् दृष्ट्वा लक्षणानि मुमूर्षताम्
न चिकित्सां प्रयुञ्जीत यशोमार्गप्रतीक्षया १६
इत्याह भगवानात्रेयः

इति भेले इन्द्रिये पञ्चमोऽध्यायः

षष्ठोऽध्यायः

अथातः पूर्वरूपीयं व्याख्यास्याम इति ह स्माह भगवानात्रेयः

अचिकित्स्याः

अन्तर्लोहितकायस्तु बहिः पाण्डुः प्रकाशते
पूर्वरूपं तदाचष्टे मानवस्य मुमूर्षतः १
बहिर्लोहितकायस्तु पाण्डुरन्तः प्रकाशते

पूर्वरूपमनुप्राप्तः स मृत्योरुच्यते नरः २
अन्तर्ग्लानो बहिः पीनो बहिराध्मात एव च
यश्चात्यन्तसमाध्मातः सर्वेऽप्येते परासुकाः ३
अभीक्ष्णं ज्वर्यते यस्तु निवातमभिनन्दति
अनुषक्तप्रतिश्यायः क्षिप्रं श्वासेन हन्यते ४
निनादी वा प्रलापी वा हसत्यत्यर्थमेव च
उन्मादेन कृशो जन्तुः पञ्चत्वमुपगच्छति ५
घनं सशूलं यो वेद सदाहं हृदयं नरः
हृद्रोगेण कृशो जन्तुर्विनाशमुपगच्छति ६
प्रस्विद्यते च कण्डूमान् यो विरुद्धं च सेवते
अविरेचनशीलश्च कुष्ठेन स विनश्यति ७
सुकुमारश्च यो जन्तुः स्नेहं मांसं च सेवते
दिवा स्वपिति चाभीक्ष्णं स प्रमेही विनश्यति ८
परिशूनश्च यो जन्तुः स्वेदे च परुषच्छविः
भिन्नं यश्चोपविशति सोऽतिसारेण हन्यते ९
यस्याग्निश्च बलं चैव नाल्पं भवति देहिनः
क्षीणलोहितमांसस्य यथा प्रेतस्तथैव सः १०
सद्यो रक्तं शिरो यस्य पीतकं वा प्रदृश्यते
कपिलं प्लुष्टकेशं वा यथा प्रेतस्तथैव सः ११
यस्य नेत्रे ललाटं च मुखं नासां भ्रुवौ तथा
जिह्मानि कुरुते वायुर्यथा प्रेतस्तथैव सः १२
श्यावा कण्टकिनी जिह्वा यस्य शुष्का प्रदृश्यते
श्यावे नेत्रे नखाश्चापि यथा प्रेतस्तथैव सः १३
यस्य निर्भिद्यते कण्ठः ताम्यत्युच्चैश्शरीरिणः
बहिरायामभाजस्तं प्रत्याचक्षीत पण्डितः १४

यस्योर्ध्वकाये बलवान् नवो रोगस्तु दुष्क्रियः
पूर्वरूपं तथा वाच्यं मानवस्य मरिष्यतः १५
यस्य चुच्छुन्दरीगन्धः पुरुषस्य भवत्यथ
सौवर्णानपि वृक्षांश्च यो वेद स विनश्यति १६
इत्येभिरीदृशैश्चान्यैर्विकारैर्वर्णितं नरः
नोपक्रमेत मेधावी य इच्छेदात्मनः सुखम् १७
इत्याह भगवानात्रेयः

इति भेले इन्द्रिये षष्ठोऽध्यायः

सप्तमोऽध्यायः

अथातः इन्द्रियानीकमिन्द्रियं व्याख्यास्याम इति ह स्माह
भगवानात्रेयः

इन्द्रियादिपरीक्षा

इन्द्रियाणि यथा जन्तोः परीक्षेत विशेषतः
आयुःप्रमाणं जिज्ञासुर्भिषक् तन्मे निबोधत १
अन्नपानात्परीक्षेत दर्शनाद्यैश्च तत्त्वतः
अर्थादिविहितं ज्ञानमिन्द्रियाणामतीन्द्रियम् २
स्वस्थेभ्यो विकृतं यस्य ज्ञानमिन्द्रियसंश्रयम्
अलक्षितं निमित्तेन लक्षणं मरणे हि तत् ३
इत्युक्तं लक्षणं सम्यगिन्द्रियेष्वशुभोदयम्
तदेव तु पुनर्भूयो विस्तरेण निबोध मे ४
घनीभूतमिवाकाशं पश्यंस्तमिव मेदिनीम्
विगीतं ह्युभयं ह्येतत्पश्यन्मरणमृच्छति ५
यस्य दर्शनमायाति मारुतोऽम्बरगोचरः

अग्निर्नायाति वा दीप्तः तस्यापि क्षयमादिशेत् ६
जलेऽपि निर्मले जालमजालं मनुते नरः
स्थिरे गच्छति वा दृष्ट्वा जीवितात्परिहीयते ७
जाग्रत्पश्यति यः प्रेतान् रक्षांसि विविधानि च
अन्यद्वाप्यद्भुतं किंचिन्न स जीवति तादृशः ८
योऽग्निं प्रकृतिवर्णस्थं नीलं पश्यति निष्प्रभम्
कृष्णं वा यदि वा शुक्लं न स जीवति मानवः ९
मरीचीनसतो मेघे मेघान्वाप्यमलाम्बरे
विद्युतो वा विना मेघान्न स जीवति मानवः १०
मृण्मयीमिव वा पात्रीं कृष्णां वापि पुरीषिताम्
आदित्यमर्धचन्द्रं वा क्षिप्रं दृष्ट्वा विनश्यति ११
नक्तं सूर्यमहश्चन्द्रमवह्नौ धूममुत्थितम्
अग्निं वा निष्प्रभं दृष्ट्वा रात्रौ मरणमादिशेत् १२
प्रभावतः प्रभां हीनां निष्प्रभान्वा प्रभावतः
नरान् विलिङ्गान् पश्यन्ति भावान् भावजिघांसवः १३
व्याकृतीनि च वर्णानि विसंख्योपचितानि च
निमित्तानि च पश्यन्ति रूपाण्यायुःपरिक्षयात् १४
यस्तु पश्यत्यदृश्यं वा दृश्यं यस्तु न पश्यति
तावुभौ गच्छतः क्षिप्रं यमक्षयमसंशयम् १५
अशब्दस्य च यः श्रोता शब्द यश्च न विन्दति
द्वावप्येतौ यथा प्रेतौ तथा ज्ञेयौ विजानता १६
विपर्ययेण यो विद्याद् गन्धानां चैव नाम तम्
न वा तत्सर्वतो विद्याद्विद्यात्तं वै गतायुषम् १७
यो रसं न विजानाति विपक्वं वा च तत्त्वतः
अपक्वं दृश्यते पक्वं तमाहुः कुशला नराः १८

उष्णान् शीतान् खरान् श्लक्ष्णान् मृदूनपि च दारुणान्
स्पृश्यान् स्पृष्ट्वा ततोऽन्यच्च मुमूर्षुस्तेषु मन्यते १९
अन्तरेण तपस्तीव्रं योगं वा विधिपूर्वकम्
इन्द्रियैरधिकं पश्यन् पञ्चत्वमुपपद्यते २०
इन्द्रियाणामृते दृष्टेरिन्द्रियार्थान्नदोषजान्
नरः पश्यति यः कश्चिदिन्द्रियैर्न स जीवति २१
स्वस्थाः प्रज्ञाविपर्यासैरिन्द्रियार्थेषु वैकृतम्
पश्यन्ति ये तु बहुशः तेषां मरणमादिशेत् २२
एतदेव च विज्ञानं यस्सम्यगनुपश्यति
मरणं जीवितं चैव स भिषग् ज्ञातुमर्हति २३
इत्याह भगवानात्रेयः

इति भेले इन्द्रिये सप्तमोऽध्यायः

अष्टमोऽध्यायः

अथातो दूताध्यायं व्याख्यास्याम इति ह स्माह भगवानात्रेयः

दूतादिनिमित्तरिष्टानि

तृणान्नखान्वा छिन्दन् वै भिषजं परिपृच्छति
आतुरस्य यदा दूतः प्रत्याख्येयस्तथाविधः १
विप्लुतं भाषमाणश्च भिषजं परिपृच्छति
आतुरस्य यदा दूतः प्रत्याख्येयस्तथाविधः २
भिनत्ति काष्ठं काष्ठेन लोष्टं लोष्ठेन वाप्यधः
आतुरस्य यदा दूतः प्रत्याख्येयस्तथाविधः ३
स्पृशन्नङ्गानि बालांश्च भिषजं परिपृच्छति
आतुरस्य यदा दूतः प्रत्याख्येयस्तथाविधः ४
पिधाय पाणिना नाभिं भिषजं परिपृच्छति

आतुरस्य यदा दूतः प्रत्याख्येयस्तथाविधः ५
कपालिकां शर्करां वा भिनत्त्यङ्गारिकामपि
आतुरस्य यदा दूतः प्रत्याख्येयस्तथाविधः ६
आस्ते भूमौ परिश्रान्तो गृह्णात्यङ्गमथ भ्रमन्
आतुरस्य यदा दूतः प्रत्याख्येयस्तथाविधः ७
नष्टं मृतमतिक्रान्तं नानुशोचन्ति पण्डिताः
इत्यातुरस्य हि यदा वदेद्दूतो न सोऽस्ति वै ८
करं करेण गृह्णाति पाणिना ताडयेत्करम्
आतुरस्य यदा दूतः प्रत्याख्येयस्तथाविधः ९
खादेदोष्ठौ च जिह्वां च नखान् दन्तैश्च कल्पयेत्
आतुरस्य यदा दूतः प्रत्याख्येयस्तथाविधः १०
आतुरस्य यदा गेहे वैद्ये वै पर्युपस्थिते
छिद्यते भिद्यते चैव प्रत्याख्येयस्तथाविधः ११
परावर्त्य घटं पूर्णं ब्राह्मणं परिपृच्छति
आतुरस्य यदा दूतः प्रत्याख्येयस्तथाविधः १२
गृध्रः सृगालः काकश्चाप्युलूको वायसस्तथा
नदेयुर्दक्षिणे पार्श्वे रोगिणो यस्य नास्ति सः १३
कषायवस्त्रो मुण्डो वा जटिलो वाथ नग्नकः
चर्मभिर्वा परिवृतो महानस्येव शाटिकः १४
तैलाभ्यक्तश्छिन्ननासो वाग्मी चोन्मत्त एव वा
भग्नौष्ठः खरवाटो वा न दूतः सम्प्रशस्यते १५
इति दूतसमाचारो व्याधितानां प्रकीर्तितः
य एवं वेद निपुणं सिद्धिकामः स वै भिषक् १६
इत्याह भगवानात्रेयः

इति भेले इन्द्रिये अष्टमोऽध्यायः

नवमोऽध्यायः

अथातो गोमयचूर्णं व्याख्यास्याम इति ह स्माह भगवानात्रेयः

गोमयचूर्णाभादिप्रयुक्तरिष्टानि

पूर्णं शिरसि यस्यैव शुष्कगोमयसन्निभम्
स्नेहिनो दृश्यते जन्तोर्मासाद्देहं जहाति सः १
कृशस्य कफरोगेण यस्य श्लेष्मपरिक्षयः
कर्णौ रक्तौ मुखं चैव द्वौ मासौ नातिवर्तते २
यस्य लोहितकाभासमम्बु तालुनि दृश्यते
क्षीणलोहितमांसस्य स मासं नातिवर्तते ३
अरुन्धतीं न पश्येत्तु स्थितां सप्तर्षिसंसदि
स मासादष्टमान्मर्त्यः क्षिप्रं प्राणैर्विमुच्यते ४
अणुकाभिश्च कृष्णाभिरास्यं जिह्वा च तालुके
सर्वतस्समनुच्छिन्नं न स जीवति तादृशः ५
शीर्षाभितापिनो यस्य श्लेष्मरोगवतस्तथा
हिक्का विनिष्यन्दते वै नायमस्तीति निर्दिशेत्
यस्य लोमानि केशाश्च प्लुष्यन्तीव शरीरिणः
संहृष्टानीव वा देही न स जीवति तादृशः ७
यस्य कालान्तरे दन्ता दृश्यन्ते रक्तसन्निभाः
निष्प्रभाश्चानुलिप्ता वा न स जीवति तादृशः ८
क्षारेण विधृतं गात्रं दृश्यते यस्य देहिनः
सममुष्णे च शीते न च स जीवति तादृशः ९
गात्रेषु स्वरवर्णेषु यस्य वारिलवप्लवः
अनभ्यक्तेषु गात्रेषु न स जीवति तादृशः १०
शूलमङ्गे भवेद्यस्य स्फुटितं रक्तमास्रवेत्

अधो गोलकसंकाशं परेतं तस्य जीवितम् ११
आपाण्डु मधुमेहे तु यश्च मेहति मानवः
अभ्यन्तरेण पञ्चाहात्स पञ्चत्वं हि गच्छति १२
अरतिश्चाविपाकश्च कार्श्यदौर्बल्यमेव च
यस्य संदृश्यते जन्तोर्न स जीवति तादृशः १३
यस्तु दीनमनाथो वा बलेन परिहीयते
भिद्यामारोगमाप्नोति यथा प्रेतस्तथैव सः १४
अनुवृत्तौ यथा जन्तुः पित्तेन परिमूर्च्छितः
संमूढवाक्यो भवति यथा प्रेतस्तथैव सः १५
यस्त्वासनेऽथ शयने रतिं न लभते नरः
स शीघ्रं कुरुते कालं यश्च साश्रूणि खादति १६
आरुह्य वानरं यस्तु संकल्पं नावबुध्यते
तमाहुः परलोकाय स्वप्ने तु कुशला नराः १७
परिसंवत्सराद्यस्य ज्वरो नापैति देहिनः
उष्णो वा यदि वा शीतो यथा प्रेतस्तथैव सः १८
यस्य जातप्रमेहस्य पिटका पाण्डुरा भवेत्
सोपद्रवा शतपदा यथा प्रेतस्तथैव सः १९
यस्योर्ध्वं क्रमते वायुः श्रोत्रं वाधः प्रवर्तते
सर्वाणि च प्रभिद्यते यथा प्रेतस्तथैव सः २०
इत्येतैर्लक्षणैर्युक्तं भिषक् दृष्ट्वैव मानवम्
नोपक्रमेत्तथा वीरो धीरो रक्षन्नात्मयशः स्फुटम् २१
इत्याह भगवानात्रेयः

इति भेले इन्द्रिये नवमोऽध्यायः

दशमोऽध्यायः

अथातश्छायाध्यायं व्याख्यास्याम इति ह स्माह भगवानात्रेयः

छायादिरिष्टानि

अनुच्छायाथवा जन्तोर्दृढच्छायाथवा पुनः
विच्छिन्ना यस्य वा छाया न स जीवति तादृशः १
यो विद्युतमिवाकाशे व्यभ्रे पश्यति मानवः
धूमायते शिरश्छाया यस्य नास्तीति तं विदुः २
लाक्षारक्तं यथा वस्त्रमेवं पश्यति यो महीम्
अथवा रक्तमाकाशं रक्तपित्तेन हन्यते ३
यो हृष्टरोमा पुरुषः कासेन श्लेष्मणाचितः
कण्ठश्च शूकानुगतो यस्य नास्तीति तं विदुः ४
यस्य शङ्खाच्च्युतं मांसं श्यावे नेत्रे तथैव च
चूर्णकश्च मुखे जातः परेतं तस्य जीवितम् ५
यस्य हस्ताच्च्युतं मांसं जन्तोर्दृश्येत कुष्ठिनः
अथाविप्रयुक्तस्य न स जीवति मानवः ६
अविपक्वं विपक्वं वा भुक्तं भुक्तं यथा भवेत्
काशश्वासज्वरैः स्पृष्टो नास्ति तस्य चिकित्सितम् ७
हृदयं पूर्वमावाति यस्य स्नातस्य देहिनः
अर्धमासात्परं तस्य जीवितं नातिवर्तते ८
ऊर्ध्वश्वासहतो यस्तु रक्तं प्रच्छर्दयेन्नरः
शूलं वा भिन्नकोष्ठस्य न स जीवति मानवः ९
अन्तर्दाहोऽधिको यस्य शीतार्तिश्चापि बाह्यतः
आकाशं परिपूर्णं वा वेत्ति यो न स जीवति १०
यस्य पक्वावुभावोष्ठौ नीलौ जम्बूफलोपमौ

उच्छूनं यस्य च शिरः परेतं तस्य जीवितम् ११
यस्योच्छूनं भवेन्मध्यमुभावंसौ कृशौ तथा
विरिक्तः पुनराध्माति यथा प्रेतस्तथैव सः १२
एतदिन्द्रियविज्ञानं यस्सम्यगनुपश्यति
स जीवितं च मृत्युं च नृणां विद्याद्भिषग्वरः १३
इत्याह भगवानात्रेयः

इति भेले इन्द्रिये दशमोऽध्यायः

एकादशोऽध्यायः

अथातः पुष्पीयं व्याख्यास्याम इति ह स्माह भगवानात्रेयः

पुष्पितादिरिष्टानि

शिरस्यङ्गे रक्तवर्णं योऽनिलं वापि पश्यति
घटिकामेकवर्णं वा स पुष्पित इहोच्यते १
अष्टापदं वा सुकृतं जगतीं यः प्रपश्यति
स दृष्टिपरिहीनत्वात्पुष्पितः प्रोच्यते नरः २
सुप्तश्च संवृते गेहे पश्यत्याकाशमेव यः
रोमन्थयति दन्तैश्च स पुष्पित इहोच्यते ३
दीप्यमानमिवाकाशं पृथिवीं च वनानि च
यो वेत्ति रोमसंहृष्टः पुष्पितः स इहोच्यते ४
अनुलिप्तो यथा देही वाति चेत्कुणपं यथा
सेवन्ते मक्षिकाश्चैव पुष्पितः स इहोच्यते ५
अविज्ञाता नरं नारी स्वप्न एव निवासिनी
दक्षिणां दिशमेहीती यं ब्रूयान्न स जीवति ६
प्रकीर्णकेशो विकरः स्वप्ने यो दक्षिणां दिशम्

प्रतिपद्येत तत्रैव न स जीवति तादृशः ७
कुशैरिव निरूढाङ्गमात्मानं स्वप्न ईक्षते
खं वा सधूमं यो वेत्ति न स जीवति तादृशः ८
यः स्वप्ने वृक्षमारुह्य न रोगी त्रायते गृहे
प्रकीर्णकेशो विकचः योऽग्निमारुह्य रोदिति ९
प्रासादमेकस्थूणं तु स्वप्ने यश्चाधिरोहति
नरो नृत्यति पङ्के वा स पुमान्न च जीवति १०
स्वप्ने प्रासादमारुह्य महान्तं काञ्चनं तथा
यो नृत्तगीतपानान्नी न स जीवति मानवः ११
गजेनोष्ट्रेण वा गच्छन् यः पश्येद्दक्षिणां दिशम्
जीवेत्तु रोगी सप्ताहं नीरोगः शिरदां शतम् १२
याति यो दुर्दिने वापि स्वप्ने वा दक्षिणां दिशम्
प्रतिबुध्येत तत्रैव न स जीवति तादृशः १३
भासैर्बर्हिवराहैश्च श्वभिर्महिषवाजिभिः
समं यो तद्दिवा योने स्वप्ने योगफलं लभेत् १४
यदा गण्डं च खङ्ग च स्वप्ने चाश्नंश्च पश्यति
प्रकीर्णकेशमपि च न स जीवति तादृशः १५
यः स्वप्ने पुरुषः कालं पीतं वा वस्त्रमृच्छति
गायन्नचेष्टयन्वापि न स जीवति तादृशः १६
यः स्वप्ने वीतकामोऽपि पीतां पिबति वारुणीम्
चित्रकण्ठगुणो वापि न स जीवति तादृशः १७
आकुलापां नदीं स्वप्ने योऽवगाहेत मानवः
जीवेत्सरोगस्सप्ताहं नीरोगश्शरदां शतम् १८
स्वप्ने स्नातानुलिप्तस्य भ्रंशेद्यस्य तु वर्णकः
गात्रस्य पुरुषस्येह स शस्त्रेण विनश्यति १९

एतदिन्द्रियविज्ञानं यस्सम्यगनुपश्यति
जीवितं चैव मृत्युं च नृणां विद्याद्विचक्षणः २०
इत्याह भगवानात्रेयः

इत्याह भेले इन्द्रिये एकादशोऽध्यायः

द्वादशोऽध्यायः

अथातोऽवाक्चितीयं व्याख्यास्याम इति ह स्माह भगवानात्रेयः

छायादिरिष्टानि

अवाक्चिता वा जिह्वा वा यस्य छायाल्पिका भवेत्
नेत्रे च विषमे स्यातां परेतं तस्य जीवितम् १
यदि दीनानि पक्ष्माणि न निमीलन्ति देहिनः
दह्येते नयने वापि परेतं तस्य जीवितम् २
नमन्त्यौ यस्य दृश्येते भ्रुवौ मूर्धनि वा स्थिते
जीवेत्तु स त्र्यहं रोगी षण्मासान् व्याधिवर्जितः ३
लुञ्चयमानेषु केशेषु वेदयन्नाति वेदनाम्
निवृत्तसुखदुःखः स्यात्परेतं तस्य जीवितम् ४
यस्यातुरस्य पिटका व्यङ्गो वा दृश्यते मुखे
अदृष्टपूर्वं प्रथमं परेतं तस्य जीवितम् ५
शुष्यते नासिकावंशः पृथुत्वं यस्य गच्छति
अंसोऽनिलात् कासवतः परेतं तस्य जीवितम् ६
अत्युष्णं वातिशीतं वा स्तब्धं वा मृदु वाप्यथ
मन्यते पाणिपादं च परेतं तस्य जीवितम् ७
योऽवतीर्य नदीं पूर्णां तोये पश्यति जालकम्
गात्रं लिप्तमथाद्भिश्च यस्य नास्तीति तं विदुः ८
विवर्तयति यः शीर्षमत्यर्थं च नसा नरः

न स्विद्यते ललाटं च नास्ति तस्य चिकित्सितम् ९
ज्वर्यते कासते वापि तथोच्छ्वसिति वै दृढम्
आक्रम्यते ताम्यते च यथा प्रेतस्तथैव सः १०
यस्योदरं समाध्मातं तद्वर्त्म च विभाव्यते
भिन्नं पुरीषं तृष्णा च यथा प्रेतस्तथैव सः ११
अनारतं गृहे यस्य कांस्यं भिद्येत देहिनः
चन्द्रस्तीक्ष्णो मृदुश्चार्को यस्य स्यात्तं विवर्जयेत् १२
अप्रधातुः प्रधातुर्वा स्वस्थो वा यदि वाऽऽतुरः
यश्चन्दनमिवावाति न स जीवति तादृशः १३
यूथिकोत्पन्नगण्डश्च वाति यश्चापि वर्त्मवत्
अभक्तः तमिमं बाल्ये यो वाति न स जीवति १४
द्विषद्भिः कुरुते सख्यं यः प्रियैर्याति विप्रियम्
अकस्मात्कुप्यते यस्तु परेतं तस्य जीवितम् १५
एभिरेवंविधैर्लिङ्गैरन्यैश्चापि यथायथम्
नोपक्रमेत मेधावी भिषगन्वितमातुरम् १६
एतद्भिषगरिष्टानां यो ज्ञानमनुबुध्यते
यथोक्तं वेद वेदायुः स भिषक् शास्त्रकोविदः १७
इत्याह भगवानात्रेयः

इति भेले इन्द्रिये द्वादशोऽध्यायः

इति भेलसंहितायामिन्द्रियस्थानं समाप्तम्